साहित्य उपशास्त्री-I तृतीय-पत्रम्

रघुवंश महाकाव्यम् -
द्वितीयः सर्गः

Saathi

Date __/__/____

प्र० (1) - पद्यमिदम् व्याख्येयम् ।

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके सिंहगमनः शरणागतवत्सलो राजा दिलीपः नन्दिन्यां स्थितं सिंहं विलोक्य तदाक्रमेणात्मनः पराजयं मन्यमानः आक्रमणकारिणः तस्य वधाय तूणीरात् बाणं निष्कासयितुमियेष ।

व्याख्या:- ततः = सिंहदर्शनानन्तरम्, मृगेन्द्रगामी = सिंहगतिः, शरण्यः = शरणागतवत्सलः, प्रसभोद्धृतारिः = बलादुन्मूलितशत्रुः, नृपतिः = राजा दिलीपः, जाताभिषङ्गः = जातपराभवः सन्, वध्यस्य = वधार्हस्य, मृगेन्द्रस्य = सिंहस्य, वधाय = व्यापादनाय, निषङ्गात् = तूणीरात्, शरं = बाणम्, उद्धर्तुम् = निष्कासयितुम्, ऐच्छत् = अभिलषितवान् ।

Renu Devi
23/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No. ____

साहित्य शास्त्री - II

रघुवंश महाकाव्यम् - त्रयोदशः सर्गः

Date ___/___/___

प्र० (1) - त्वं रक्षसा भीरु! यतोऽपनीता तं मार्गमेताः कृपया लता मे ।
अदर्शयन् वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति -

व्याख्या - हे भीरु! = भयशीले सीते! त्वम् = भवती । रक्षसा = राक्षसेन रावणेन । यतः = येन मार्गेण । अपनीता = अपहृता । तम् = तादृशम् मार्गम् = पन्थानम् । वक्तुम् = भाषितुम् । अशक्नुवत्यः = असमर्थाः, वागिन्द्रियाभावाद्वक्तुमसमर्थाः । एताः = इमाः । लताः = वल्लयः आवर्जितपल्लवाभिः = पाणिस्थानीयाभिर्नमितकिसलयाभिः । शाखाभिः । शाखाभिः = भुजस्थानीयैः विटपैः । कृपया = दयया । मे = मम कृते । अदर्शयन् = दर्शितवत्यः । असूचयन्निवेति
अयि भयशीले जानकि! रावणः त्वामपहृत्य येन मार्गेण गतवान्, तं मार्गं मानवा इव वक्तुमसमर्था एता लताः दयार्द्रा सत्यः अङ्गुलिभिरिव अवनमितकिसलयैर्विटपैरदर्शयन् अत एतास्ते सख्यः ताः पश्य, यतो हि चैतन्यात् वृक्षलतादयोऽपि समदुःखभाजो भवन्ति । तथाहि भगवान् मनुः -

तमसा बहुरूपेण वेष्टिताः कर्महेतुना ।
अन्तः संज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥

Renu Devi
23/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No. ____

साहित्य शास्त्री - I

अभिज्ञानशाकुन्तलम्
पञ्चमोऽङ्कः

Date ___/___/_____

प्र० (1) - पद्यमिदम् व्याख्येयम् ।

प्रजागरात्खिलीभूतस्तस्याः स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥

उत्तरम् - प्रसङ्गः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम्-नाट्यशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके राजा दुष्यन्तः आत्मनो दुःख-सहनाशक्तत्वं कथयन् राजा दुष्यन्तो माधव्यं ब्रूते -

व्याख्या - प्रजागरात्=रात्रिजागरणात्, तस्याः=मम प्रियायाः शकुन्तलायाः स्वप्ने=निद्रायां, समागमः=मत्समीपागमनमिति स्वप्नसमागमः दर्शनं तु खिलीभूतः=उपहतः प्रतिहतः निषिद्धः, अनिद्रया विनाशितः विघ्नितः किञ्च बाष्पः तां तां पूर्वावस्थां स्मरतो मे दुःखान्नेत्राभ्यां स्रवदश्रुजलम् तु चित्रगतामपि=आलेख्ये लिखितामपि एनां प्रियां द्रष्टुं = अवलोकयितुं न ददाति=दर्शनं प्रतिसन्धे, चित्रादिना मनोविनोदनमपि मे दैवं न सहते किं करोमि मन्दभाग्यः इति भावः। अत्र हेत्वनुप्रासौ अलंकारौ अनुष्टुप छन्दश्च।

Renu Devi
23/08/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

साहित्य उपशास्त्री-II तृतीय-पत्रम्

रघुवंश - महाकाव्यम्

द्वितीयः सर्गः

Saathi

Date __/__/____

(1) प्र० - पद्यमिदम् व्याख्येयम् ।

तं विस्मितं धेनुरुवाच साधो! मायां मयोद्भाव्य परीक्षितोऽसि ।

ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति । अस्मिन् श्लोके नन्दिनी राजा दिलीपं प्रति - उवाच -

व्याख्या:- विस्मितं = विस्मयान्वितम्, चकितं वा, तं = राजानं दिलीपम्, धेनुः = नन्दिनी, उवाच = अवदत्, साधो! = हे सज्जनशिरोमणे!, मया = नन्दिन्या, मायां = शाम्बरीम्, उद्भाव्य = कल्पयित्वा, परीक्षितोऽसि = सम्यक् परीक्षितोऽसि, ऋषिप्रभावात् = वसिष्ठतपोऽनुभावात्, मयि = नन्दिन्याम्, अन्तकोऽपि = यमोऽपि, प्रहर्तुम् = प्रहारं कर्तुम्, न प्रभुः = नैव समर्थः । अन्यहिंस्रा = इतरे घातुकाः प्राणिनः = क्षुद्राणि सिंहादि घातुकान्तराणि वा किमुत अतितरामेव न प्रभवन्ति ।

Renu Devi

23/08/20

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।